सूर्यग्रहण शांति श्लोकाः

सूर्यग्रहण शांति श्लोकाः

शांति श्लोकः –
इंद्रोऽनलो दंडधरश्च रक्षः
प्राचेतसो वायु कुबेर शर्वाः |
मज्जन्म ऋक्षे मम राशि संस्थे
सूर्योपरागं शमयंतु सर्वे ||

ग्रहण पीडा परिहार श्लोकाः –
योऽसौ वज्रधरो देवः आदित्यानां प्रभुर्मतः |
सहस्रनयनः शक्रः ग्रहपीडां व्यपोहतु || 1

मुखं यः सर्वदेवानां सप्तार्चिरमितद्युतिः |
चंद्रसूर्योपरागोत्थां अग्निः पीडां व्यपोहतु || 2

यः कर्मसाक्षी लोकानां यमो महिषवाहनः |
चंद्रसूर्योपरागोत्थां ग्रहपीडां व्यपोहतु || 3

रक्षो गणाधिपः साक्षात् प्रलयानलसन्निभः |
उग्रः करालो निर्ऋतिः ग्रहपीडां व्यपोहतु || 4

नागपाशधरो देवः सदा मकरवाहनः |
वरुणो जललोकेशो ग्रहपीडां व्यपोहतु || 5

यः प्राणरूपो लोकानां वायुः कृष्णमृगप्रियः |
चंद्रसूर्योपरागोत्थां ग्रहपीडां व्यपोहतु || 6

योऽसौ निधिपतिर्देवः खड्गशूलधरो वरः |
चंद्रसूर्योपरागोत्थां कलुषं मे व्यपोहतु || 7

योऽसौ शूलधरो रुद्रः शंकरो वृषवाहनः |
चंद्रसूर्योपरागोत्थां दोषं नाशयतु द्रुतं || 8

ॐ शांतिः शांतिः शांतिः |